# संवत्सरस्य वैज्ञानिकं विश्लेषणम्

**डॉ. रामदेव साहू**

प्रोफेसर एवं विभागाध्यक्ष (वेदविज्ञान)

विश्वगुरुदीप आश्रम शोध संस्थान, जयपुर (राज.)

प्रजापतिर्वै संवत्सरः[1]। अयं हि ब्रह्मावच्छिन्नो भवति। एवं च ब्रह्माभिन्नो वक्तव्यः। प्रजापतिरेव सन्तायमानस्य सन्तानभूता इमे वेदा अभवन्[2]। तथा च मनःप्राणाभ्यां कृतोदरा वागेवैते त्रयो वेदाः। एवञ्चायं वेदाभिन्नोऽपि मन्तव्यः। अस्य प्रजापतेर्दश व्यूहाः संप्रोक्ताः[3]। तत्र इन्द्र इति प्रथमो व्यूहः। अयमनिरुक्तोऽनन्यप्रजापति[4]रित्यनया संज्ञया व्यवह्रियते। अस्य स्थानं हृदयमस्ति। चितेनेधेयाग्निरिति द्वितीयो व्यूहः[5]। अयममृताग्निरूपो देवग्रामः। अस्य स्थानं प्राणाः। चित्याग्निरिति तृतीयो व्यूहः[6]। अयं मर्त्यरूपो भूतग्रामः। अस्य स्थानं शरीरम्। पाशुकाग्निरिति चतुर्थो व्यूहः[7]। अयं पोषा पशुग्रामः। अस्य स्थानं प्राणिवर्गः। त्रयीति पञ्चमो व्यूहः। अयं वेदस्वरूपः यज्ञस्वरूपो वा। अस्य स्थानं सहस्रम्। सहस्रशब्दोऽत्र विशिष्टो विज्ञातव्यश्च। तदुच्यते तैत्तिरीयब्राह्मणे यदुक्तम् - अग्निर्न्यवर्तयत स साहस्रमपुष्यदिति तदनुसारं सृष्टिबीजपिण्डस्य शिपिविष्टाख्यस्य विष्कम्भः सहस्रप्रगुणितो यावदवकाशे प्रथमानो ध्रियते तावदवकाशा इमे वेदा इत्यतः सहस्रं नाम[8]। उक्तञ्च ऋग्वेदे - 'सहस्रधा पञ्चदशान्युक्था यावद् द्यावापृथिवी तावदित् तत्। सहस्रधा महिमानः सहस्रं यावद् ब्रह्म विष्ठितं तावती वाक्[9]' इति। अथर्वेति षष्ठो व्यूहः[10]। अयं हि तुरीयवेदरूपः। अस्य स्थानं सहस्रमण्डलान्तं परिधिः। छन्द इति सप्तमो व्यूहः[11]। इदं हि छन्दश्चातुर्विध्यम् आत्मनश्छादितत्वात्। अस्य स्थानं छन्दोवृत्तानि। विराड् इत्यष्टमो व्यूहः[12]। अयं हि मर्त्यान्तःप्रतिष्ठितः यज्ञाधिष्ठानो वा। अस्य स्थानम् महद् उक्थम्[13]। शिपिविष्ट[14] इति नवमो व्यूहः। अयं हि पश्वन्तः प्रतिष्ठितः यज्ञाधिष्ठानो वा। अस्य स्थानम् गूळ्हं । संवत्सर इति दशमो व्यूहः[14]। अयं हि सहस्रान्तोऽथर्वान्तो वा। अस्य स्थानं साम सर्वत्रसंस्थितमिति।

अस्य संवत्सरप्रजापतेरुत्पत्तिरेवमाख्याता वाजिश्रुतौ -

'आपो ह वा इदमग्र सलिलमेवासत अकामयन्त - कथं नु प्रजायेम हीति। ता अश्राम्यत्। तास्तपोऽतप्यन्त। तासु तपस्तप्यमानासु हिरण्मयमाण्डं सम्बभूव। अजातो ह तर्हि संवत्सर आस। तदिदं हिण्मयमाण्डं यावत्संवत्सरस्य वेला तावत्पर्यप्लवत। ततः संवत्सरे पुरुषः समभवत्। स प्रजापतिः। स इदं हिण्मयमाण्डं व्यरुजत्। न हि तर्हि काचन प्रतिष्ठा

आस। तदेतमिदमेव हिरण्मयमाण्डं यावत्संवत्सरस्य वेलाऽऽसीत् तावद् बिभ्रत् पर्य्यप्लवत। सः संवत्सरे व्याजिहीर्षत्। स भूरिति व्याहरत्। सेयं पृथिव्यभवत्। भुव इति तदन्तरिक्षमभवत्। स्वरिति साऽसौ द्यौरभवत्। स एवेमान् लोकान् जातान् संवत्सरे प्रजापतिरभ्युदतिष्ठत्। स सहस्रायुर्जज्ञे। सोऽर्चञ्छ्राम्यँश्चचार प्रजाकामः। स आत्मन्नेव प्रजापतिमधत्त। स आस्येनैव देवानसृजत्। ते देवा दिवमभिपद्यासृज्यन्त। तस्मै स सृजानाय दिवे वास। तदहरकुरुत।

अथ योऽयमवाङ्प्राणस्तेनासुरानसृजत। त इमामेव पृथिवीमभिपद्यासृज्यन्त। तस्मै स सृजानाय तम इवास। तां रात्रिमकुरुत। ते अहोरात्रे। स ऐक्षत प्रजापतिः। सर्वं वा अत्सारिषं य इमा देवता असृक्षीति। स सर्वत्सरोऽभवत्। सर्वत्सरो ह वै नामैतद् यत् संवत्सर इति। स ऐक्षत - इमे वा आत्मनः प्रतिभामसृक्षि यत्संवत्सरमिति तस्मादाहुः प्रजापतिः संवत्सर इति।[16]'

संवत्सरप्रजापतेः सृष्ट्युत्पादने निर्वासनं मुख्यं प्रयोजनमासीत्। यथोक्तं तैत्तिरीयसंहितायाम्-

'परमेष्ठिनो वा एष यज्ञोऽग्र आसीत्। तेन स परमां काष्ठामगच्छत्। तेन प्रजापतिं निरवासयत्। तेन प्रजापतिः परमां काष्ठामगच्छत्। तेन इन्द्रं निरवासयत्। तेनेन्द्रः परमां काष्ठामगच्छत्। तेनाग्नीषोमौ निरवासयत्। तेनाग्नीषोमौ परमां काष्ठामगच्छताम्।[17]'

'संवत्सर शब्देऽपि ' त्सरि धातुः प्रयुक्ताऽस्ति। वैदिकमते निर्वासनेऽभिचरणे च त्सरि धातुः प्रयुज्यते। लोके 'त्सर छद्मगतौ' इति सुप्रसिद्धैव समित्युपसर्गः। वकारो वाग्बोधकः। तथा हि वाच एव छद्मगतिः। तद्विषये प्रोक्तम्-

'प्रच्छन्ना गतिःत्सरः। यथा मृगयुर्गच्छति। यथा वा शशः शुने व्यापादकायात्मानं गोपायित्वा दूरमपसरति, तथा प्रजापतेः रसाः प्रच्छन्नं बहिर्धा गताः, संवत्सर इन्द्रवाचं परितोऽग्निरन्नादः। तं परितः सोमोऽन्नम्। सर्वमभिव्याप्यैतदापः प्रचरन्ति। परोवरीणः प्राणो वायुरिन्द्राख्यः पर्यन्तमभिव्याप्नोति।[18]'

अनेन पर्यन्तव्यापिनी वायुप्रच्छन्ना प्राणान्यतरस्वरूपा वागेव वकारेणोपलक्षिता। सा चाद्या वाक् यावत्पर्यन्तं गता तस्याः कालावधिरेव 'संवत्सर' शब्देनाभिहितः। किन्त्वेष संवत्सरः कस्यासीत्। कस्यायं वाऽऽयत्त इति चेदुच्यते संवत्सरारम्भतोऽन्तं यावत् पञ्चाधिदेवता असृज्यन्त-अग्निः इन्द्रः सोमः परमेष्ठी प्राजापत्यश्च[19]। एते पञ्चैव लोकानामधिष्ठातारः। तथा हि अग्निः पृथिवीलोकस्य, इन्द्रो वायुरन्तरिक्षलोकस्य, सोमोऽमृतं स्वर्लोकस्य, परमेष्ठी नक्षत्रलोकस्य, प्राजापत्याश्च नाकलोकस्याधिष्ठातारः सन्ति। एवञ्चेत् अधिष्ठातृभेदादेव संवत्सरभेदावुक्तौ।

एवञ्च संवत्सरः पञ्चधा - पार्थिव संवत्सरः, सौर संवत्सरः, चान्द्रसंवत्सरः नाक्षत्रसंवत्सर, प्रजापति संवत्सरश्चेति।

**पार्थिवसंवत्सर** :- पृथिव्या निर्गता रश्मयः ब्रह्माण्डे यावत् गच्छन्ति तावत्पर्यन्तिकगतिकालः पार्थिव संवत्सरो भवति। प्रायेण वैश्वानरवीथीं यावत् पृथिव्या रश्मयः प्रयान्ति, अतएव पृथिव्याः संवत्सरमण्डलं वैश्वानरवीथीं स्पृशति। पृथिव्या वायुमण्डलं त्यक्त्वा यदा तस्माद् बहिस्ता रश्मयः प्रयान्ति तदा सौररश्मीनाहत्य वैश्वानरं ता उत्पादयन्ति। सः वैश्वानर एव उपरि गत्वा वीथीं निर्माति। एषा वैश्वानरवीथी ग्रहनक्षत्रमण्डलयोः पृथक्करणं निर्दिशति। पार्थिव संवत्सरेऽहोरात्रमधिकृत्य कालगणना विधीयते। यतो हि पृथिव्यामेवाहोरात्रस्थितिर्भवति, नान्यत्र।

**सौरसंवत्सरः** - सूर्यरश्मयो ब्रह्माण्डे यावत् गच्छन्ति तावत्पर्यन्तिकगतिकालः सौरसंवत्सर इत्यभिधीयते। प्रायेण बृहतीपंक्तिवृत्तपर्यन्तं सूर्यरश्मयः प्रयान्ति। उक्तं च 'आदित्यो बृहतीमध्यूढस्तपति' इति। बृहतीवृत्तस्याधोभागे एव दृश्यपृथिवी संस्थिताऽस्ति। अस्या पृथिव्या यो भागः पंक्तिवृत्तमतिक्रम्य वर्तते तत्र सूर्यरश्मयो न भासन्ते। विशेषेण त्रिष्टुब्वृत्ते । एवं पंक्तिवृत्तपर्यन्तं सूर्यरश्मीणां गतिकालमधिकृत्य सौरसंवत्सरस्य कालगणना विधीयते। सौररश्मिषु गायत्राग्नि-सावित्राग्निभेदात् गतिभेदो दिग्भेदश्च भवतः तस्मात्सूर्यगतेरयनद्वयं सम्भवति उत्तरायणं दक्षिणायनं च। अस्य सौरसंवत्सरस्यारम्भ उत्तरायणान्मन्यते।

**चान्द्रसंवत्सरः** - चन्द्ररश्मयो ब्रह्माण्डे यावत् गच्छन्ति तावत्पर्यन्तिकगतिकालः चान्द्र संवत्सर उच्यते। चन्द्ररश्मयोऽपि सूर्यरश्मीव बृहतीपंक्तिवृत्तपर्यन्तं प्रयान्ति। चन्द्ररश्मय सोमप्रधाना भवन्ति। सोमस्य न्यूनाधिक्यादेव ऋतव उत्पद्यन्ते। पंक्तिवृत्तं यावत् पांक्तयज्ञस्य पञ्चपर्वाधारेण पञ्चर्त्तवो मन्यन्ते वैदिकाः। अस्य चान्द्रसंवत्सरस्यारम्भो वसन्तान्मन्यते। चैत्रवैशाखयोर्वसन्त इति ज्योतिःशास्त्रीयमान्यतानुसारं चैत्रमासाच्चान्द्र-संवत्सरारम्भः पृथिवीवासिनः स्वीकुर्वन्ति। तत्राप्यहोरात्राधारेणाहरित्यस्य प्राथम्येन शुक्लपक्षस्याद्यत्वं स्वीकुर्वाणा शुक्लजुग्र्वेदीयसंहितापाठिनः चैत्रशुक्लपक्षादस्यारम्भं स्वीकुर्वन्ति। ये पुनः कृष्णपक्षान्मासारम्भं स्वीकुर्वाणा कृष्णयजुर्वेदसंहिताध्यायिनस्ते चैत्र कृष्णपक्षादेवास्यारम्भं स्वीकुर्वन्ति।

**नाक्षत्रसंवत्सरः** - अयं पारमेष्ठ्यसंवत्सर इत्यप्युच्यते। नक्षत्राणां परमेष्ठिनोऽधीनत्वात् परमेष्ठिमण्डलगतत्वाच्च। नक्षत्ररश्मयो ब्रह्माण्डे यावत् गच्छन्ति तावत्पर्यन्तिकगतिकालः नाक्षत्रसंवत्सरः पारमेष्ठ्यसंवत्सरो वाऽप्युच्यते। नक्षत्ररश्मीणां गतिरपि सूर्यचन्द्ररश्मिगतितुल्या। तस्मादासामपि गतिः तावद्दूरवर्त्तिन्येव मन्तव्या। नक्षत्ररश्मयः सोमाग्न्योः समांशमय्यो भवन्ति। तासां गतिश्चन्द्ररश्मीणां गतिमनुसरति। तस्मादेव चन्द्रमा

नक्षत्राणामधिपतिरुच्यते। नक्षत्राणि सप्ततिंशतिः सन्ति। तेष्वाद्यं नक्षत्रम् अश्विनी अस्तीति ज्योतिषशास्त्रेऽभिमतम्। अहस्करः सूर्यो यदा अश्विन्यां स्थिति करोति, तदा नाक्षत्र संवत्सरारम्भो मन्यते।

**प्राजापत्य संवत्सरः** - तपः लोक संस्थितः सविता प्रजापतिः। तस्य रश्मयस्त्रैलोक्यं प्रविश्य ब्रह्माण्डे यावत् गच्छन्ति तावत्पर्यन्तिकगतिकालः प्राजापत्यसंवत्सर इत्युच्यते। प्रायेण सवितृरश्मयो भूरादीन् सप्तोर्ध्वलोकान् व्याप्नुवन्ति, किन्तु त्रैलोक्ये प्रवेशानन्तरं ता अपि सूर्यरश्मिष्वेव समाहिताः सन्त्यः पंक्तिवृत्तपर्यन्तमेव प्रयान्ति। एवञ्च त्रैलोक्ये सूर्यरश्मिभिरासां गतिसाम्यमेवाकलितव्यम्। प्रजापतिः रोहिणीनक्षत्रस्याधिपतिरस्ति, अतः यदा सूर्यो रोहिणी नक्षत्रे गतिमारभते तस्मात्कालादेव अस्य प्राजापत्यसंवत्सरस्यारम्भो भवति।

## नवसंवत्सरो नलसंवत्सरः

संवत्सरो वै प्रजापतिः। प्रजानां चराचराणां जीवानां पतिः रक्षकोऽयमस्ति। वासर-वत्सर-संवत्सर शब्दा अत्र विशेषेण बोध्याः। वासर इति अह्नो नाम। वा गतिगन्धनयोरिति धातोः क्विपि कृते 'वा' शब्दो वायुप्राणस्य वाचकः। यस्यारम्भे वायुप्राणः प्रवर्तते प्राणगर्भो वायुर्वा सरति गतिं करोति स वासरो भवति। एवमेव वद् धातोः क्विपि कृते 'वत्' शब्द प्राणगर्भायाः वाचो वाचकः। यस्यारम्भे प्राणगर्भा वाक् सरति गतिं करोति स वत्सरो भवति। इयं हि प्राणगर्भा वाक् यस्मिन् सम्यगवतिष्ठते सः संवत्सरः षष्ठ्युत्तरशतत्रयसंख्याकानामह्नां समवायः।

अस्माकं ब्रह्माण्डं वर्तुलाकारमस्ति तच्च वृत्तधर्मत्वात् षष्ट्युत्तरशतत्रयांशेषु परिधौ विस्तारेणोभयत्र वर्गीकृतम्। अस्य मध्यस्थानीयः सूर्यः प्राणानामधिष्ठाता। इत एव प्राणाः सरन्ति परिधिं प्रति। तत्राशीत्युत्तरशतमिता अंशाः सूर्यात् पूर्वभागे सन्ति, किन्तु पृथिव्याः पश्चिमभागे स्थित्याः ततः चतुर्विशंति-चतुर्विंशत्यंशक्रमेण यानि छन्दोवृत्तानि परिगणितानि, तेषु बृहतीमारभ्य पंक्तिं यावत् स्थूला पृथिवी अस्ति, जगतीवृत्तं यावत् सूक्ष्मा पृथिवी अस्ति। बृहती वृत्त एव दृश्यपृथिवी अस्ति। अस्या दृश्यपृथिव्या आरम्भादन्तं यावत् क्षेत्रमेव वर्तमाने पृथिवी इति व्यवह्रियते। ब्रह्माण्डवृत्तस्य पूर्वपरिधेः पंक्तिवृत्तस्यान्तं यावत् शतत्रयमंशाः पूर्णा भवन्ति, तत्रैव प्रतिषडंशक्रमेण नलसंवत्सरोऽपि स्थितिं करोति। अयं चतुर्नवत्युत्तरशतद्वयमितांशेभ्य आरभ्य शतत्रयमितांशान् यावत् अवतिष्ठते। अस्य संवत्सरस्य नाम नरःनलःनडो वाऽस्ति। रलयोरभेदाद् डलयोरभेदाच्च नल इत्यस्यैव व्यवहारः। अत्रापि 'न रीयते' इति व्युत्पत्त्या अपः स्थानीयनरावस्थितेः समानान्तरसंस्थितेरयं नरः। 'न लीयते' इति व्युत्पत्त्या इतोऽग्रे सूर्योदयसूर्यास्तयो-

रभावान्नलोऽयमुच्यते। 'न डीयते' इति व्युत्पत्त्या इतोऽग्रवर्त्तिनाम् उत्क्रान्त्यभावान्नड इत्युच्यते। दृश्यपृथिव्याः उष्मान्तिमभागादारभ्य प्रकाशभागं यावदवस्थितेरयं नल एव प्राणगर्भाया वाचश्चरमत्वमावहति।

## सन्दर्भ

1. शतपथब्राह्मणम् - 11/1/1/15

2. सोऽयं त्रय्यां विद्यायामथर्व विद्योत्तरायां ब्रह्मणि प्रतिष्ठितः प्रजापति ब्रह्मावच्छिन्नत्वाद् ब्रह्मोच्यते। आत्मना ब्रह्मणा सृष्टोऽयं वेदो ब्रह्म। वेदावच्छिन्नस्यैवात्मनः सर्वत्र स्वरूपाधानान्नायं वेदो ब्रह्मणो व्यतिरिच्यते (महर्षिकुलवैभवम्-पृ. 61)

3. दशविधात्वेऽपि प्राधान्यात् त्रैविध्यमेव नेयम् - नभ्य इन्द्रोऽनिरुक्तः प्रजापतिः, सा प्रतिष्ठाः, शिपिविष्टो विराट् प्रजापतिः तदुक्थम्। सर्वे लोकाः सर्वे वेदाः संवत्सरः प्रजापतिः तत्साम इत्थमेतं त्रिवृत्कृतमात्मानं विद्यात् (महर्षिकुलवैभवम्-पृ. 63)

4. एकविंशतितमे स्तोमे विद्यमान ऐन्द्रवैद्युत् एव नभ्यप्रजापतिरित्युच्यते। उक्तं च ऐन्द्रः प्राजापत्यः स्वर्गोऽयं सूर्यपिण्डो यः। नभ्यो वैद्युत् पुरुषो गमयत्यात्मानमानन्दम्।।

अपि च, प्रजापतिः सप्तदशोऽयंनभ्यस्त्विन्द्रोऽस्ति कौषीतकिराह तो द्वौ।

यद् ब्रह्म यत् क्षत्रमिति प्रभेदान्नभ्यं द्विधा प्राह च याज्ञवल्क्यः।। (महर्षिकुलवैभवम्-पृ. 52)

5. पृथिव्या बहिर्मण्डलाकृतौ निस्सृता अग्निरश्मयो यदा वायुमण्डलादुपरि प्रयान्ति तदा ते चितेनिधेयाग्निरुच्यन्ते।

अस्मिन् चितेनिधेयाग्नौ वाक्तत्त्वं संश्लिष्टं भवति। अयं च रथन्तरं साम यावत् गतिं करोति।

6. पृथ्वीपिण्डे य विद्यमानोऽग्निःसग्निरेव चित्याग्निरस्ति। अयमेष पार्थिवद्रव्येषु सजीवेषु निर्जीवेषु चापि व्याप्तो भवति। यावदयं चित्याग्निःसजीवेषु तिष्ठति तावदेव तस्यायुर्भवति। एवमेव यावदयं निर्जीवेषु तिष्ठति तावदेव तेषामस्तित्वं भवति, पश्चादवस्थान्तरमुपपद्यते। एवं च मर्त्यधर्मित्वं चित्याग्नेरवधेयम्।

7. तैत्तिरीयसंहिता/पृ.292

8. महर्षिकुलवैभवम् - पृ. 62

9. ऋग्वेदसंहिता - 10/114/8

10. न थुर्वति गच्छतीत्यतोऽथर्वा गत्यवरोधकः।

11. छन्दोविदुर्वाग्नियतिं द्विधा तद् वायौ हि मर्त्यामृतजातिभेदात्।

छन्दाँसि मर्त्यानि विशेषतोऽष्टौ संकेतितार्थानि निदानशास्त्रे।। (महर्षिकुलवैभवम्-पृ. 52)

12. अमृताग्निः मर्त्याग्निः पाशुकाग्निश्चेत्येतदग्निविशेषत्रितयं संहत्य विराडित्युच्यते (महर्षिकुलवैभवम्-पृ. 49)

13. लोकश्चितोऽग्निः प्रथमोऽन्तरिक्षं महाव्रतं द्यौर्महदुक्थमस्ति।

उक्थं दिवं याति महाव्रतं तु स्यादन्तरिक्षे स्थितिरत्र सोऽग्नि।। (महर्षिकुलवैभवम्-पृ. 55)

यदेतन्मण्डलं तपति तन्महदुक्थं ता ऋच स ऋचां लोकः (शतपथ - 10/5/2/1)

14. वानस्पत्यसोममयो वायुविशेषस्तन्मण्डलं शिपिविष्टसंज्ञम्।

15. प्रजापतेरयं द्वादशस्तनुः। उक्तं च - एष प्रजापतिर्द्वादशधा परिच्छिद्यते। अग्निरादित्यः सोमः पशवो वायु र्मृत्युः पृथ्वी द्यौरग्निरादित्यो मनः संवत्सरश्चेति।

16. शतपथ ब्राह्मण - (11/1/6/1-13)

17. तैत्तिरीयसंहिता / पृ. 368

18. महर्षिकुलवैभवम्-पृ. 65

19. शतपथ - (11/1/6/1/19)